① 

351. 'भक्ति' शब्दस्य प्रकृतिः (धातुः) प्रत्ययश्च लिखत? ✓
उ. "भज सेवायाम्" धातोः 'क्तिन्' प्रत्यये कृते सति 'भक्तिः' इति निष्पद्यते यस्यार्थः सेवा, शुश्रुषा, पूजा च इत्यादयः।

352. शाण्डिल्योपनिषदि भक्त्याः लक्षणं किम् उक्तम्? ✓
उ. "सा परानुरक्तिरीश्वरे" अर्थात् ~~परे~~ परमेश्वरे अविचला, ऐकान्तिकी भावना तथा च आत्मसमर्पणस्य उत्कटाकांक्षा इति।

353. नारदभक्तिः सूत्रानुसारं भक्तिः किम् अस्ति?
उ. "सा तस्मिन् ~~प्रेम~~ परमप्रेमरूपा" अर्थात् भगवन्तं प्रति परमप्रेम एव भक्तिः इति।

354. 'भक्तिरसायनं' नामके ग्रन्थे भक्त्याः कति भेदानां वर्णनं प्राप्यते? ✓
उ. 'द्वौ' भेदौ। "भक्तिस्तु द्विविधा प्रोक्ता परापरेति संज्ञिता" इति अर्थात् पराभक्तिः अपराभक्तिश्च इति।

355. गौणी भक्तिः कस्याः नाम वर्तते? ✓
उ. 'अपराभक्त्याः'

356. 'अपराभक्तिः' कतिविधा? ✓
उ. द्विविधा। वैधी भक्तिः रागात्मिकाभक्तिश्च।

357. 'वैधी भक्तिः' नाम किम्? ✓
उ. वैधी भक्तिः नव प्रकारीकी वर्तते अतः नवधाभक्तिः अपि उच्यते।

358. श्रीमद्भागवतपुराणस्य 7/5/23 इत्यस्यानुसारं नवधाभक्तिः उच्यते? ✓
उ. "श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥" इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा। अर्थात् श्रवणं (परीक्षितः), कीर्तनं (शुकदेवः), स्मरणं (प्रह्लादः) पादसेवनं (लक्ष्मी), अर्चनं (पृथुराजा), ~~अक्रू~~ वन्दनं (अक्रूरः), दास्यं (हनुमानः) सख्यं (अर्जुनः) आत्मनिवेदनञ्च (बलिराजा) एतदेव नवधाभक्तिः उच्यते।

359. श्रवणभक्त्याः किं तात्पर्यमस्ति? ✓
उ. ईश्वरस्य महिमा, स्तुतिः, गुणगानं, शक्तिः स्तोत्रादीन् परमश्रद्धया श्रवणम्।

360. कीर्तनभक्त्याः कोऽभिप्रायः? ✓
उ. ईश्वरगुणाः, चरित्रं, नाम, पराक्रमं, शक्तिः महिमेत्यादीन् आनन्दोत्साहेन गानं एव कीर्तनम् उच्यते।

Scanned with CamScanner

(2)

किं नाम स्मरणभक्तिः? ✔
उ. नैरन्तर्येण अनन्यभावेन च ईश्वरमाहात्म्यं शक्तिम् इत्यादीन् मनसि निधाय प्रसन्नोभूत्वा ईश्वरस्मरणम् एव स्मरणभक्तिः उच्यते।

362. पादसेवनभक्तिः नाम किम्? ✔
उ. भगवतः चरणयुगलयोः सेवनम् इति।

363. अर्चनभक्त्याः कोऽभिप्रायः? ✔
उ. अर्चनं नाम पूजनं। ईश्वरस्य शास्त्रोक्तविधीना पूजनमेव अर्चनम् उच्यते। भक्तिरेषा स्थूल वस्तुभिः (पदार्थ) मानसिकर्पैः च क्रियते।

364. वन्दनभक्त्याः कोऽभिप्रायः? ✔
उ. परमश्रद्धया माता-पिता, गुरु-आचार्यः, विद्वज्जनः, योगीः तथा च सन्तजनान् ईश्वररूपं ज्ञात्वा नमनं, सेवनञ्च इति एवम् प्रियाचरणमेव वन्दनम् उच्यते।

365. दास्यभक्तिः नाम किम्? ✔
उ. भगवन्तं प्रति सेवकभावेन उपासकभावेन च समर्पणमेव दास्यभक्तिः उच्यते यथा - वीरभक्त हनुमानः। सः भगवन् रामचन्द्रं प्रति समर्पितोऽभवत्।

366. 'सख्यभाव:' इत्यस्य कोऽर्थः? ✔
उ. भगवन्तं प्रति सख्यभावं स्थाप्य ~~भक्ति~~ भक्तौ लीनता एव सख्यभावभक्तिः उच्यते।

367. आत्मनिवेदनभक्त्याः कोऽभिप्रायः? ✔
उ. ईश्वरस्य भक्तिविशेषेण सर्वदा स्वं सर्वदा भगवच्चरणे समर्पणं तथा च स्वस्य स्वतन्त्रसत्ता न स्यात् इति। एतद् एव आत्म-निवेदनम् इत्युच्यते।

368. रागात्मिकभक्तिः कम् उच्यते? ✔
उ. नवधाभक्तेः चरमावस्थायाः अग्रिमा अवस्थाः भवति रागात्मिकभक्तिः भगवन्तं प्रति अलौकिकं प्रेमः इति। शास्त्रेष्वपि उक्तम् - "रसात् भाविको आनन्दशक्तिदा रागात्मिका" अर्थात् दिव्यप्रेमरसं आनन्दं च या: भक्तिः ददातिसा रागात्मिका भक्तिः उच्यते।

369. "पराभक्तिः" नाम किम्? ✔

उ. रागात्मिका भक्तेः चरमावस्था पराभक्तिः उच्यते। पराभक्तौ उपास्य उपासकश्च एकैव सञ्जायते अर्थात् विशुद्धः अखण्डं चैतन्य तत्त्वमेव अवशिष्यते। ~~स्तादृशी~~ एतस्याः कृते भक्तं बाह्यसाधनानाम् आवश्यकता न भवति। तदा सः निराकारः, निर्गुण ब्रह्मणः उपासनां कुर्वन् सात्विकानन्दं भवति।

370. श्रीमद्भगवद्गीतायाः अष्टादशमाऽध्यायस्य नाम किम्? ✔

उ. भक्तियोगः।

371. श्रीमद्भगवद्गीतानुसारं ~~भक्त~~ कतिप्रकारको भक्तः भवति? वर्णयत। ✔

उ. "चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥ (गीता 7/16) अर्थात् हे भरतवंशी अर्जुनः! उत्तमकर्मकः अर्थार्थी, आर्तः, जिज्ञासु तथा च ज्ञानी एतादृशाः चतुर्विधा भक्ताः मां भजन्ति।

372. श्रीमद्भगवद्गीतानुसारं कः भक्तः श्रेष्ठः इति? ✔

उ. ज्ञानीभक्तः।

373. आर्तभक्तः कः भवति? ✔

उ. यः भक्तः सांसारिकेषु आपद्दासु उत्त ~~...~~ क्लेशेषु मां भजति सैव आर्तभक्तः भवति।

374. जिज्ञासु भक्तस्य कोऽभिप्रायः? ✔

उ. यः ब्रह्मतत्व जिज्ञासया ईश्वरं भजति सः जिज्ञासु भक्तः कथ्यते।

375. अर्थार्थी भक्तस्य किं तात्पर्यम्? ✔

उ. यः सांसारिक वस्तुनि यथा - स्त्री, धनं, पुत्रः, वैभवं, मानं, प्रतिष्ठा चेत्यादीन् प्राप्तुं ईश्वरं भजति सैव अर्थार्थी भक्तः उच्यते।

376. ज्ञानीभक्तं सर्वश्रेष्ठ भक्तः किमर्थम् उक्तम्? ✔

उ. ज्ञानीभक्तः सदैव ब्रह्मणि ध्यानं करोति तथा च ~~निष्का~~ निष्काम भावेन कर्माणि ~~कु~~ करोति एतस्मात् कारणादेव ज्ञानी भक्तः सर्वश्रेष्ठः उच्यते। गीतायामपि उक्तं यत् - "ज्ञानी त्वात्मैव मे मतम्" अर्थात् ज्ञानीभक्तः तु ममैव स्वरूपं वर्तते एतद् मे मतम्।

Scanned with CamScanner

प्र. भक्तियोगे मोक्षस्य कति अवस्था: उक्तासन्ति?
उ. चत्वार:। सालोक्य, सामीप्य, सारूप्य सायुज्यश्च इति।

378. ~~भक्ति~~ भक्ते: ~~चत्वारि अ~~ चतस्र अवस्था: विस्तरेण स्पष्टीकरोतु।
उ. 1. सालोक्य → भगवता सह भगवल्लोके निवासम्।
2. सामीप्य → भगवत् समीपे वासम्।
3. सारूप्य → भगवतानुरूपं ~~स्वस्य~~ स्वरूपं।
4. सायुज्य → भगवता सह पूर्णरूपेण एकीभावं तथा च तद्रूपस्थिति: इति।

379. श्रीमद्भगवद्गीतायां कस्मिन् अध्याये दैवासुरसम्पद: विभाजनं कृतं वर्तते?
उ. षोडशतम: अध्याये। ✓

380. श्रीमद्भगवद्गीतायां दैवीसम्पद: कानि लक्षणानि उक्तानि? ✓
उ. "अहिंसा सत्यमक्रोधस्त्याग: शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥
तेज: क्षमा धृति: शौचमद्रोहो नातिमानिता।
भवन्ति सम्पदं दैवीमभिजातस्य भारत॥ (गीता - 16/2-3)

अर्थात् मनसा, वाचा कर्मणा कमपि केनापि प्रकारेण न पीड़नं, यथार्थ: प्रियभाषणञ्च, स्व अपकारं य: करोति तस्योपरि अपि क्रोधाभाव:, कर्मसु कर्तापन ~~अभिमा~~ अहं भाव त्याग:, अन्त:करणोपरति अर्थात् चित्तस्य चञ्चलता अभाव:, निन्दा अभाव:, सर्वेषु भूतप्राणिषु हेतुरहितं दया भाव:, इन्द्रियाणां विषयै: सह संयोगेऽपि आसक्तेरभाव:, कोमलता, लोक तथा च शास्त्रविरुद्ध: आचरणे लज्जा, व्यर्थ चेष्टाया/इच्छाया: अभाव:। तेज:, क्षमा, धैर्य:, बाह्यशुद्धि: केषुचित् अपि शत्रुभावस्य अभाव:, स्वस्मिन् पूज्यताया: अभिमानस्य अभाव:। एतानि सर्वाणि लक्षणानि तु हे अर्जुन:! दैवीसम्पद् पुरुषस्य लक्षणानि वर्तन्ते।

381. श्रीमद्भगवद्गीतायाम् असुरीसम्पद: लक्षणानि कानि उक्तानि? ✓
उ. "दम्भो दर्पोऽभिमानश्च क्रोध: पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्॥ (गीता 16/4) अर्थात्
~~काम:, क्रोध:, लोभश्चेति एतत् त्रयं नरकद्वारं इति, अधोगामि इति मानि~~

Scanned with CamScanner

हे पार्थ! दम्भः, दर्पः, अभिमानं, क्रोधः अज्ञानमित्यादयः आसुरीसम्पदः पुरुषस्य लक्षणानि सन्ति।

382. श्रीमद्भगवद्गीतायां "नरकद्वारं" कुत्र उक्तम्?
उ. "त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्॥" (गीता 16/21) अर्थात् कामः क्रोधः लोभश्च एतत् त्रयं नरकस्य द्वारं वर्तते यत् आत्मनः नाशकोऽस्ति अर्थात् अधोगतिं प्रतिनयति। अतः एतत् त्रयाणां त्यागः करणीयम्।

383. भक्तेः व्युत्पत्तयः का-का सन्ति?
उ. भजनं भक्तिः, भज्यते अनया इति भक्तिः
भजन्ति अनया इति भक्तिः, भगवति मनः स्थिरीकरणं भक्तिः॥

384. "रसो वै रसः" कथनस्य तैत्तिरीयोपनिषदि अभिप्रायं वर्तते?
उ. अत्र भक्तिरसे आनन्दस्वरूपपरमात्मनः एव रसः इति उक्तम्।

385. श्रीमद्भगवद्गीतायाः द्वादशाध्यायानुसारं भगवताश्रीकृष्णेन कथं रीत्या भक्तगुणानां वर्णनं कृतम्?
उ. भक्तस्य गुणानां वर्णनम् एवमस्ति यत् -
"अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहंकारः समदुःखसुखः क्षमी॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥ (13-14)

अर्थात् यः पुरुषः सर्वभूतेषु द्वेषरहितः, स्वार्थरहितः, मैत्रीयुक्तः, करुणः निर्ममः, निरहङ्कारः, सुखदुःखे समः क्षमाशीलश्च, अभयदाता तथा च यः योगी सन्तुष्टः, इन्द्रियैः सह दृढनिश्चयी एवञ्च मनोबुद्ध्या मयि अर्पितो भक्तः मे प्रियः अस्ति।
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः॥ (16)
अर्थात् यः पुरुषः आकांक्षा, शुचिर्दक्षः, चातुर्यः, उदासीनः सर्वारम्भपरित्यागी भक्तः मे प्रियो वर्तते।

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥ (17)

386. गीतायां कस्मिन् अध्याये भोजनवर्गीकरणं वर्तते? ✓
उ. सप्तदशाऽध्याये।

387. गीतायाः द्वादशाऽध्याये भक्तस्य कानि लक्षणानि वर्णितानि? ✓
उ. यः अद्वेषः, सर्वेषां मित्र तथा च निरहङ्कारः निर्ममः सुखदुःखे समभावः, धैर्यशीलः, सन्तुष्टः एवञ्च येन मनबुद्धिं परमात्मनि समर्पितम् इति

388. गीतायाम् ईश्वरप्राप्त्यर्थं भक्तियोगस्य किमुपायः वर्णितः? ✓
उ. कर्माणि ईश्वरे समर्पणं। अनन्यभक्त्या ईश्वरचिन्तनं। अहङ्काराभावः इति।

389. गीतायाः केषु अध्यायेषु भक्तियोगस्य वर्णनं प्राप्यते?
उ. सप्ततः द्वादशाऽध्यायः पर्यन्तम्।

390. श्रीमद्भगवद्गीता महाभारतग्रन्थस्य भीष्मपर्वणि श्लोकसंख्याः अस्ति? ✓
उ. भीष्मपर्वणः त्रयोविंशतितः चत्वारिंशत् पर्यन्तम्।

391. छान्दोग्योपनिषदानुसारं मनः, प्राणः, वाक् च कस्य सूक्ष्मतमं ✓
भागं वर्तते?
उ. मनः, प्राणः, वाक् च। यदन्नं भक्षितं तस्यैव सूक्ष्मतमं भागः मनोऽस्ति। यज्जलं पीतं तस्यैव सूक्ष्मतमं भागः प्राणम् अस्ति। तथा च भक्षितस्य आग्नेयांशस्य सूक्ष्मतमं भागः वाणी अस्ति।
"अन्नमशितं योऽणिष्ठस्तन्मनः। आपः पीताः योऽणिष्ठः स प्राणः।
तेजोऽशितं योऽणिष्ठः सा वाक्॥" (6. 5. 1 तः 3 पर्यन्तम्)

392. छान्दोग्योपनिषदानुसारं "तत् त्वमसि" इत्यस्य अभिप्रायं किम् अस्ति? ✓
उ. "तत् त्वमसि" महावाक्यं वर्तते। तत् = परमात्मा, त्वम् असि = त्वं जीवः अर्थात् जीवः परमात्मनः एव अंशः अस्ति। सर्वस्मिन् जगति परमात्मनः सूक्ष्मरूपं व्याप्तोऽस्ति। परमात्मनः शक्तिः जीवेऽपि वर्तते।

Scanned with CamScanner

93. श्वेताश्वतरोपनिषदि वर्णितः प्रकृतेः गुणत्रयं स्पष्टयत।

उ. श्वेताश्वतरोपनिषदि सत्त्वगुणस्य कृते शुक्लः, रजोगुणस्य कृते लोहितं तथा च तमोगुणस्य कृते कृष्णः शब्दानां प्रयोगं कृतं वर्तते। सांख्ये योगदर्शने च एतेषां गुणत्रयाणामेव विवेचनं कृतमस्ति।

"अजामेकां लोहित-शुक्ल-कृष्णां बह्वीः प्रजाः सृजमानां सरूपाः"
(श्वेता. 4/5)

394. "असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्माऽमृतं गमय" उपदेश वाक्योऽयं कस्योपनिषदस्य वर्तते तथा च अर्थम् अपि स्पष्टयत।

उ. बृहदारण्यकोपनिषदस्य 1/3/28

अर्थः - हे परमात्मन्! अस्मान् असततः सतं प्रति, अन्धकारतः प्रकाशं प्रति तथा च मृत्युतः अमरत्वं प्रति नयतु इति।

395. छान्दोग्योपनिषदनुसारं "सर्वं खल्विदं ब्रह्म" कथनमिदं स्पष्टयत।

उ. "सर्वं खल्विदं ब्रह्म" अर्थात् संसारोऽयं ब्रह्मरूपो वर्तते। जगत्यस्मिन् ब्रह्मः एव सर्वोत्तमा शक्तिः वर्तते। इदम् अद्वैतवादस्य उद्घोषः वर्तते। ब्रह्मः 'तत् जलान्' इत्यपि उच्यते। सः ज + ल + अन् अस्ति। ज = सृष्टिः जायते, ल = ब्रह्मणि लयः, अन् = तस्मात् कारणात् सर्वेषु प्राणशक्तिः वर्तते।

" सर्वं खल्विदं ब्रह्म, तज्जलान् इति शान्त उपासीत (3/14/1)

396. श्रीमद्भगवद्गीतायाः 18/14 इत्यस्य अनुसारं सर्वेषां कर्मणां सिद्धये पञ्चहेतवः के सन्ति? ✓

(8)

" अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥" अर्थात् कर्मसिद्धौ अधिष्ठानं, कर्ता, नानाविध करणाः, नानाविध-चेष्टाः सन्ति तथा च एवञ्च तथैव पञ्चमः हेतु दैवः अस्ति ।

397. श्रीमद्भगवद्गीतायाः 18/14 इत्यस्मिन् वर्णितम् अधिष्ठानं, करणं दैवञ्च इत्यादि शब्दानाम् अभिप्रायः किम्?
उ. अधिष्ठानं → यस्य आश्रितो भूत्वा कर्मः कुर्मः तस्य नाम अधिष्ठानम् ।
करणं → यैः इन्द्रियैः उत साधनैः कर्माणिक्रियन्ते तस्य नाम करणम् ।
दैवः → पूर्वकृत कर्मः, शुभाशुभकर्मसंस्काराः दैवः भवति इति ।

398. "नाडी" शब्दस्य कोऽभिप्रायः?
उ. नाडी → खाद्यपदार्थाः, पेयः तथा च रक्तपरिवहनाय दीर्घ-लघु मार्गाः, लसीका, वायोः कृते मार्गाः इति ।

399. विभिन्नेषु योगग्रन्थेषु वर्णित योगाभ्यासेन शुद्धः स्वस्थश्च शरीरस्य नाडी संख्याः कति सन्ति?
उ. हठप्रदीपिका ग्रन्थे → 72000 नाड्यः
शिव-संहिता ग्रन्थे → सार्धः त्रिलक्षः (3,50,000)
प्रश्नोपनिषदि → 72 कोटि-72 लक्ष 10 सहस्र एकाधिक द्विशतं नाड्यः ।
(72,72,10201) उपनिषदेषु सर्वप्राचीनः सन्दर्भः अस्ति ।

400. पञ्चकोशानां स्थूलं, सूक्ष्मं कारणंचशरीरानुसारं विभाजनं किम् अस्ति?
उ. स्थूलशरीरं → अन्नमयकोशः ।
सूक्ष्मशरीरं → प्राणमयकोशः, मनोमयकोशः, विज्ञानमयकोशश्च ।
कारणशरीरं → आनन्दमयकोशः ।

Scanned with CamScanner